फलादा पन—कर्मणि असच्।(काँटाल)वृक्षभेदे फलादौ न॰ “पनसं शीतलं पक्वं स्निग्धं पित्तानिलापहम्। तर्पणं बृंहणं स्वादु मांसलं श्लेष्मलं भृशम्। बल्यं शुक्रप्रदं हन्ति रक्तपित्तक्षतक्षयान्। आमन्तदेव विष्टम्भि वातलं तुवरं गुरु। दाहकृन्मधुरं बल्यं कफमेदोविमर्दनम्। पनसोद्भूतबीजानि वृष्याणि मधुराणि च। गुरूणि बद्धवर्चांसि सृष्टमूत्राणि संवदेत्” अन्यत्र “मज्जा पनसजो वृष्यो वातपित्तकफापहः। विशेषात् पनसं वर्ज्यं गुल्मिभिर्मन्दवह्निभिः। अलं पनसपाकाय फलं कदलसम्भवम्” भावप्र॰ “कण्टाफलं सुमधुरं बृंहणं स्निग्धशीतलम्। दुर्जरं वातपित्तघ्नं श्लेष्मशुक्रबलप्रदम्। तदेव सर्पिषा युक्तं स्निग्धं हृद्यं बलप्रदम्। छर्दिघ्नं न च चक्षुष्यं वृष्यञ्च वातपित्तनुत्। कण्टाफलमपक्वन्तु कषायं स्वादु वातलम्। रक्तपित्तहरं स्वादु तत्फलास्थ्यपि तद्गुणम्” राजवल्लभः।

**पनसतालिका** स्त्री पनसं स्तुल्यं तालं तत्तुल्यफलं विद्यते ऽस्याः टन्। पनसे शब्दमा॰ पनतालिकेति तत्र पाठान्तरं तत्रार्थे।

**पनसिका** स्त्री पनसः तदाकारोऽस्त्यस्याः ठन्। सुश्रुतोक्ते क्षुद्ररोगरोगभेदे २३८२ पृ॰ दृश्यम्।

**पनस्य** नामधा॰ पनं स्तुतिमिच्छति क्यच् सुमागमः स्तोत्रेच्छायां पर॰अक॰सेट्। पनस्यति अपनस्यीत् ऋ॰१।५५।२ उदा॰ तत्र तङ् आर्षः। निघण्टौ तु पनस्यधातुः अर्चतिकर्मसु पठितः तेन पूजायामपि। [१।२८।५

**पनस्यु** त्रि॰ पनस्य नामधातुः उ। आत्मनः स्तोत्रेच्छौ ऋ॰

**पनिष्टम** त्रि॰ पन—कर्मणि इसुन् अतिशयेन पनिः तमप्। स्तुत्यतमे साम॰ १।२,२।४

**पनिष्ठ** त्रि॰ अतिशयेन पनिता इष्ठन् तृणोलोपः। स्तोतृतमे ऋ॰६।५८।२ ईयसुन्। पनीयस् तत्रार्थे स्त्रियां ङीप्

**पनिस्पद** त्रि॰ स्पन्द—यङ्लुक् अच् अभ्यासे निगागमः। भृशं स्पन्दमाने अथ॰ ५।२०।१६

**पनु** स्त्री पन—उ। स्तुतौ ऋ॰ १।६५।२ [जाते सि॰कौ॰।

**पन्थक** त्रि॰पथि जातः “पथः पन्थ च” पा॰ कन्। पथि-

**पन्न** त्रि॰ पद—क्त। १च्युते २गलिते च अमरः। ३गते पद—नन्। ४नीचगमने न॰ उज्ज्वल॰।

**पन्नग** पु॰ पन्नमधोमुखं यथा तथा गच्छति, पद्भ्यां न गच्छति वा गम+ड। १सर्पे अमरः जातौ ङीष् सर्प्याम्। २पद्मकाष्ठे मेदि॰ ३सीसके न॰।

**पन्नगकेशर** पु॰ पन्नग इव केशरोऽस्य। नागकेशरे राजनि॰ तस्य सर्पफणातुल्यकेशरत्वात् तथात्वम्।

**पन्नगारि** पु॰ ६त॰। गरुड़े

**पन्नगाशन** पु॰ पन्नगः अशनमस्य। गरुड़े अमरः पन्नगभोजनादयोऽप्यत्र। तस्य तद्भोक्तृत्वकथा भा॰आ॰ अमृताहरणप॰ दृश्यम्।

**पन्नद्धा** स्त्री पदि नद्धा। चर्मपादुकायां हेमच॰।

**पन्नद्धी** स्त्री पदः नद्धीव नह—क्त—ङीष् वा ६त॰। चर्ममयपादुकायां त्रिका॰।

**पन्नागार** पु॰ प्राच्ये गोत्रप्रवर्त्तकर्षिभेदे तस्यापत्यम् इञ्। पान्नागारि तदपत्ये पुंस्त्री॰। बहुत्वे इञोलुक्। पन्नागारा इत्येव।

**पन्निष्क** पुंन॰ पादो निष्कस्य एकदेशिस॰ वा पदादेशः। निष्कस्य चतुर्थभागे पदादेशाभावे पादनिष्कोऽप्यत्र।

**पन्य** त्रि॰ पन—स्तुतौ अघ्न्यादि॰ यत्। स्तुत्ये ऋ॰२।२६।२

**पन्यस्** त्रि॰ पन—असुन् युगागमः। १स्तोतरि ऋ॰ ८।८।२ उदा॰। २स्तुत्ये च ६।१८।६ उदा॰।

**पपि** पु॰ पा—कि द्वित्वम्। १चन्द्रे २पानकर्त्तरि च त्रि॰।

**पपी** पु॰ पा—ईक् द्वित्वम्। १चन्द्रे २सूर्य्ये च उज्ज्वल॰।

**पपु** त्रि॰ पा—कु द्वित्वम्। पालके उज्ज्वल॰।

**पपुरि** त्रि॰ पॄ—कि द्वित्वम्। प्रीणनशीले। ऋ॰१।१५।४

**पपृक्षेण्य** त्रि॰ सम्पर्कार्हे। ऋ॰ ५।३३।६ भाष्ये स्थितम्।

**पप्रि** त्रि॰ प्रा॰पूरणे कि द्वित्वम्। पूरणशीले यजु॰ १,८।

**पफक** पु॰ गोत्रर्षिभेदे ततः तिका॰ गोत्रे फिञ्। पाफकायनि तद्गोत्रापत्ये। बहुत्वे निरवकेन सह फिञोलुक्। कफकनिरवका इत्येव

**पमरा** स्त्री (बक्की) ख्याते गन्धद्रव्यभेदे राजवल्लभः।

**पम्पस्** दुःखे कण्ड्वादौ कण्ड्वा॰ प॰अक॰ सेट्। पम्पस्यति अपम्पस्यीत्।

**पम्पा** स्त्री १दक्षिणस्थनदीभेदे भा॰अनु॰१।६। ऋष्यमूकशैलसमीपस्थे २सरोभेदे च “एषा पम्पा शिवजला बहुतोया तड़ागिनी” भा॰व॰ २७६अ॰। ततः वरणादि॰ चातुरर्थिकस्य लुक्। पम्पानामदूरभवं नगरं पम्पा इत्येव।

**पम्ब** गतौ भ्वा॰प॰सक॰सेट्। पम्बति अपम्बीत् पपम्ब।

**पय** गतौ भ्वा॰आत्म॰सक॰सेट्। पयते अपयिष्ट।

**पयःकन्दा** स्त्री पयः दुग्धमिव स्वादुत्वात् कन्दोऽस्याः। क्षीरविदार्य्याम् राजनि॰। [भा॰व॰ १२० अ॰।

**पयःपयोष्णी** स्त्री पयःप्रचुरा पयोष्णी शा॰त॰। नदीभेदे